Total No. of Questions—30] [Total No. of Printed Pages—7

# M—107

## SANSKRIT (Special) GROUP-B

Time : 3 Hours

Maximum Marks : 100

निर्देश :

(1) सर्वे प्रश्ना: अनिवार्या: सन्ति।

(2) प्रश्नानाम् अङ्का: तेषां सम्मुखे लिखिता: सन्ति।

**Instructions :**

(1) All questions are compulsory.

(2) Marks for each question are given opposite to each question.

1. अधोलिखित गद्यांशस्य अनुवादं हिन्दीभाषायां लिखत : 4

Translate the following passage into Hindi :

कस्मिंश्चित् कूपे गङ्गदत्तो नाम मण्डूकराजः प्रतिवसति स्म। स कदाचिद् दायादैरुद्वेजितोऽरघट्ट घटीमारुह्य निष्क्रान्तः। अथ तेन चिन्तितं यत् 'कथं तेषां दायादानां मया प्रत्युपकार: कर्तव्य: ?'

अथवा *(Or)*

दया नाम सर्वभूतेषु सर्वत्र अनुग्रहः। आर्जवं नाम मनोवाक्कायकर्मणां विहिताविहितेषु जनेषुप्रवृत्तौ निवृत्तौ वा एकस्वरूपत्वम्। क्षमा नाम प्रियाप्रियेषु ताडनपूजनेषु सहनम्। धृतिः नाम अर्थ हानौ स्वेष्टबन्धुवियोगे तत्प्राप्तौ सर्वत्र चेत: स्थापनम्।

2. अधोलिखित पद्यांशस्य अनुवादं हिन्दीभाषायां लिखत : 4

Translate the following verses into Hindi :

पुरस्कृता वर्त्मनि पार्थिवेन
प्रत्युद्गता पार्थिवधर्मपत्न्या।
तदन्तरे सा विरराज धेनु-
र्दिनक्षपामध्यगतेव सन्ध्या॥

अथवा *(Or)*

मदेकपुत्रा जननी जरातुरा

नवप्रसूतिर्वरटातपस्विनी।

गतिस्तयोरेष जनस्तमर्दयन्

अहो विधे! त्वां करुणा रुणद्धि नो॥

3. अधोलिखित गद्यांशस्य हिन्दीभाषायाम् अनुवादं कुरुत : 4

Translate the following Passage into Hindi :

उष्णमश्नीयात्, उष्णं हि भुज्यमानं स्वदते, भुक्तं चाग्निमौदर्यमुदीरयति, क्षिप्रं जरां गच्छति, वातमनुलोमयति। श्लेष्माणं च परिह्रासयति, तस्मादुष्णम् अश्नीयात्।

अथवा *(Or)*

अस्ति मध्यदेशालङ्कारभूता मेखलेव भुवो विंध्याटवी नाम। तस्यां च पम्पाभिधानं पद्मसर:। तस्य पश्चिमे तीरे महाजीर्ण: शाल्मलीवृक्ष:। तस्यैवैकस्मिन् कोटरे निवसत: कथमपि पितुरहमेव सूनुरभवम्।

4. अधोलिखितेषु प्रश्नेषु प्रश्नत्रयाणाम् उत्तराणि संस्कृतभाषायां लिखत : 6

Answer any **three** of the following questions into Sanskrit :

(i) कीदृश: पुरुष: मानं न लभते?

(ii) मृत्यो: मोक्षार्थं कं यजामहे?

(iii) सौन्दरनन्दं महाकाव्यं केन प्रणीतम्?

(iv) सव्यसाची कं समुद्दिश्य तस्थौ?

(v) लोक: क्व प्रतिष्ठित:?

5. अधोलिखितेषु प्रश्नेषु त्रयाणाम् प्रश्नानाम् उत्तराणि संस्कृते लिखत : 6

Answer any **three** of the following questions into Sanskrit :

(i) महाभाष्यं कस्य कृतिरस्ति?

(ii) नौसारथि: क: बभूव?

(iii) महातपा मुनिर्दुर्वासा केन सह कलहम् अकरोत् ?

(iv) विद्येश्वर: क: आसीत् ?

(v) पम्पाभिधानं पद्मसर: कुत्रासीत् ?

6. 'धर्मानुवर्तनं श्रेय:' इति पाठस्य सारांशं प्राय: 60 शब्देषु हिन्दीभाषायां लिखत । 4

Write in brief the lesson 'धर्मानुवर्तनं श्रेय:' in about 60 words in Hindi.

7. 'सत्यान्नास्ति परं पदम्' इति पाठस्य सारांशं प्राय: 60 शब्देषु हिन्दीभाषायां लिखत । 4

Write in brief the lesson 'सत्यान्नास्ति परं पदम्' in about 60 words in Hindi.

8. 'त्वत्समो न धनुर्धर:' इति पाठस्य आधारे अर्जुनस्य चारित्र्यं 60 शब्देषु लिखत । 4

Write the lesson 'त्वत्समो न धनुर्धर:' describe the character of Arjun in about 60 words in Hindi.

9. अधोलिखित वाक्यांशस्य आशयं हिन्दीभाषायाम् स्पष्टी कुरुत : 2

Explain the following into Hindi :

सुदुर्लभे नार्हति कोऽभिनन्दितुं
प्रकर्षलक्ष्मीमनुरूपसङ्गमे।

अथवा *(Or)*

यस्यार्थयुक्तं गिरिराजशब्दं
कुर्वन्ति बालव्यजनैश्चमर्य:।

10. 'कथासरित्सागर' ग्रन्थस्य रचयिता क: ? 2

Who was the writer of 'कथासरित्सागर'?

11. अधोलिखितस्य **शब्दद्वयस्य** सन्धिविग्रहं कृत्वा सन्धे: नाम लिखत : 2

Disjoin the Sandhis of any **two** of the following and give the name of the Sandhis used :

(i) कवीन्द्र:

(ii) दासोऽयम्

(iii) सच्चित

(iv) गणेश: ।

12. अधोलिखितस्य शब्दद्वयस्य सन्धिं कृत्वा सन्धि नाम लिखत : 2

Join the Sandhis of any **two** of the following and give the name of the Sandhis used :

(i) ब्रह्म + ऋषि:

(ii) यश: + दा

(iii) जगद् + ईश:

(iv) सत्यम् + वद।

13. अधोलिखितेषु निर्देशानुसारं शब्दत्रयस्य रूपाणि लिखत : 3

Write three words froms as directed of the following :

(i) किम् (पु.) — प्रथमा, वचनत्रयम्

(ii) दिक् — तृतीया, वचनत्रयम्

(iii) वधू — पञ्चमी, वचनत्रयम्

(iv) विद्वस् — चतुर्थी, वचनत्रयम्

(v) गुरु — द्वितीया, वचनत्रयम्।

14. अधोलिखितेषु शब्देषु रूपत्रयाणां विभक्तिं वचनं च लिखत : 3

Write the Vibhakti and Vachan of any **three** of the following words :

(i) सर्वेषाम्

(ii) यस्मिन्

(iii) पयसे

(iv) गुरुभि:

(v) वध्वा।

15. अधोलिखितेषु धातुरूपेषु पदत्रयाणां लकार-पुरुष-वचनानि लिखत : 3

Write down the Lakar, Purush and Vachan of any **three** of the following :

(i) अपचत्

(ii) कथयेयु:

(iii) लभताम्

(iv) नृत्याम:

(v) लप्स्यते।

16. अधोलिखितेपु-धातुरूपेषु पदत्रयाणां निर्देशानुसारं रूपाणि लिखत : 3

Write down the Root forms of any **three** of the following as directed :

(i) पच् — लृट्लकार—प्रथमपुरुष

(ii) मन् (आत्म.) — लोट्लकार—मध्यमपुरुष

(iii) भ्रम् — लङ्लकार—उत्तमपुरुष

(iv) चिन्त् — विधिलिङ्—प्रथमपुरुष

(v) लिख् — लट्लकार—उत्तमपुरुष।

17. 'अव्ययीभाव' समासस्य परिभाषां लिखत। 2

Write the definition of 'अव्ययीभाव' Compound.

18. अधोलिखितेषु समस्तपदेषु कस्यापि समासद्वयस्य विग्रहं कृत्वा नाम लिखत : 2

Disjoin the compound of any **two** and name the compound used :

(i) कृष्णार्जुनौ

(ii) उपगङ्गम्

(iii) चन्द्रशेखर:

(iv) पञ्चवटी।

19. 'शिखरिणी' छन्दस: सोदाहरणं परिभाषां लिखत। 4

Write the definition of the metre 'शिखरिणी' with example.

20. 'वसन्ततिलका' छन्दस: लक्षणं लिखत। 2

Give the definition of the metre 'वसन्ततिलका'।

21. यमक-अलंकारस्य सोदाहरणं परिभाषां लिखत। 6

Give the definition of the Yamak Alankar with example.

22. 'कुमारसंभवे' कति सर्गाः सन्ति? 2

How many Sargas have 'Kumarsambhava' ?

23. महाकविना भवभूत्या कति नाटकानि लिखितानि? तेषां नामानि लिखत। 2

How many Natkas are written by Bhavbhuti ? Write their names.

24. 'हर्षचरितस्य' रचयिता कः? 2

Who is the writer of the 'हर्षचरित' ?

25. 'अष्टाध्यायी' ग्रन्थस्य लेखकः कः? 2

Who is the writer of the 'अष्टाध्यायी' ?

26. स्वस्य प्राचार्य महोदयस्य कृते अवकाशप्राप्त्यर्थं एकं प्रार्थना-पत्रं संस्कृते लिखत। 4

Write an application to your Principal for leave in Sanskrit.

अथवा *(Or)*

स्वस्य अनुजस्य परिणयोत्सवे आमन्त्रयन् मित्रस्य कृते संस्कृतभाषायाम् एकं पत्रं लिखत।

Write a letter to your friend to invite the marriage of your younger brother.

27. अधोलिखित विषयम् अधिकृत्य एकस्मिन् विषये 150 शब्देषु निबन्धं संस्कृते लिखत : 8

Write an essay on any **one** of the following topics in Sanskrit in about 150 words :

(i) सत्सङ्गतिः

(ii) संस्कृतस्य गौरवम्

(iii) दीपोत्सवः

(iv) परेषाम् उपकारः।

28. अधोलिखित अपठित गद्यांशस्य सारांश: त्रिंशत् शब्देषु (30) हिन्दीभाषायां लिखत : 4

Write the substance of the following unseen passage in Hindi in about 30 words :

भारते प्रायेण आषाढ-मासात् प्रावृट्कालस्य प्रारम्भः भवति। आकाशे मेघाः प्रकटिताः भवन्ति। यदा आकाशात् प्रथम-जल-बिन्दवः पृथिव्यां पतन्ति तदा उत्सव इव जायते। सर्वं जगत् आनन्देन परिपूर्णं भवति। सस्यानि रोहन्ति। नवाङ्कुशः जायन्ते। पक्षिणः सुखेन कूजन्ति। पशवश्च मुदिताः इतस्ततः धावन्ति। नद्यः तडागाश्च जलपूर्णाः जायन्ते। कालेन सर्वत्र हरीतिमा प्रसरति।

29. अष्टाविंशति-प्रश्नस्य गद्यांशाधारिते अधोलिखित प्रश्नानाम् उत्तराणि संस्कृते लिखत : 3

Write the answer of the following questions in Sanskrit based on passage Question No. 28 :

(i) वर्षाकालस्य आरम्भः कदा भवति ?

(ii) वर्षाकाले किं किं भवति ?

(iii) वर्षाकाले पशवः किं कुर्वन्ति ?

30. अष्टाविंशति-प्रश्नस्य गद्यांशस्य उपयुक्त शीर्षकं लिखत। 1

Give the suitable title of the Question No. 28.